International Journal of Multidisciplinary Horizon

ISSN: **3049-2017**
IJMH 2025; 2(5): 114-116
© 2025 IJMH
www.themultijournal.com
Received: 21-10-2025
Accepted: 26-10-2025
Publish : 28-10-2025

**श्री चन्द्रमौलि कल्याणः**
सहायकाचार्यः(अतिथिः),
व्याकरणविभागः,एकलव्यपरिसरः,
केन्द्रीयसंस्कृतविश्वविद्यालयः,
अगरतला

**Correspondence:**
**श्री चन्द्रमौलि कल्याणः**
सहायकाचार्यः(अतिथिः),
व्याकरणविभागः,एकलव्यपरिसरः,
केन्द्रीयसंस्कृतविश्वविद्यालयः,
अगरतला

# नञर्थ-विवेचनम्

**श्री चन्द्रमौलि कल्याणः**

**शोधसारः-**

भावाभावभूतेऽस्मिन् जगति अभावस्य विषये नञर्थः वैशिष्ट्यं भजते। निषेधार्थकमव्ययरूपम्, अयं "नञ्" विधेरर्थं विशेषयति, पदपदार्थवाक्यार्थानां यथार्थबोधे उपयुक्तां भूमिकां निर्वहति च। यद्यपि सर्वासु दार्शनिकशाखासु नञः निषेधार्थकता एवाभिमता, तथाप्यस्य स्वरूपमर्थबोधकत्वं चाधिकृत्य विभिन्नाः मतयः दरीदृश्यन्ते। निषेधार्थकस्याव्ययस्यास्य स्वरूपस्य एवम् अर्थबोधप्रक्रियायाश्च विषये व्याकरणन्यायमीमांसादर्शनानि विशेषेण बहुकिञ्चित् निगदयन्ति। एतन्नञ् कदाचित् समासेषु कुत्रचिद् वाक्येषु पृथक् च प्रयुज्यते। यथा- "अघटं पश्यति" "घटो नास्ति" इत्यादिषु स्थलेषु। किञ्च समस्तव्यस्तयोः उभयोर्मध्ये कुत्र नञः कोऽर्थः, कस्मिन्नर्थे स्वीकृते यथार्थबोधो भविष्यति? इत्यादिशङ्कानिवृत्तये सुतरां नञर्थस्य विचारः आवश्यकः। प्रबन्धेऽस्मिन् व्याकरणदिशा नञर्थः निरूप्यते।

**कूटशब्दाः-**

नञ्, निपातः, पर्युदासः, प्रसज्यः, सादृश्यम्, अभावः, अन्यत्वम्, अल्पत्वम्, अप्राशस्त्यम्, विरोधः, द्योतकम्, द्योत्यम्, अरोपितत्वम्

**षड्विधः नञर्थः-**

सामान्यतया नञर्थः निषेधरूपः इति उच्यते तावत्, परं नञर्थः अपि नाना। तस्य प्रसिद्ध्या षट्-भेदाः बहुत्र प्रस्तूयन्ते शास्त्रकृद्धिः। तेषां च ज्ञानं नञः प्रयोगे नितराम् आवश्यकमिति धिया प्रत्येकं सुस्पष्टं विचारणीयम्। तदुक्तं हरिणा-

**"तत्सादृश्यमभावश्च तदन्यत्वं तदल्पता।**
**अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्तिताः"।।**[1] **इति।**

एवं तत्सादृश्यम्, अभावः, तदन्यत्वं तदल्पत्वम्, अप्राशस्त्यम्, विरोधः इति षडर्थाः नञः स्वीकृताः इति फलितार्थः। ते च अर्थाः सोदाहरणं विविच्यन्ते -

१.***तत्सादृश्यम्*** - अव्ययरूपो नञ्, येनार्थेन सह सम्बध्यते तत्सम्बद्धस्य पदार्थस्य सदृशस्य पदार्थस्य ग्रहणं यत्र वर्तते स तत्सादृश्यरूपः अर्थः। अत्र तु तत्सादृश्यस्य तात्पर्यं नञा सहान्वितस्य पदार्थस्य ग्रहणम् इत्याशयः। यथा "अब्राह्मणमानय" इत्यस्मिन् वाक्ये प्रयुक्तस्य नञस्तात्पर्यं ब्राह्मणाद्भिन्नस्य आनयनमिति, किन्तु तत्रापि ब्राह्मणसदृशस्य मनुष्यत्वद्विजत्वादिगुणैः संयुक्तस्य क्षत्रियादेरेव ग्रहणम्। न ह्यत्र ब्राह्मणत्वादिभिन्नस्य पशोः ओष्ठादेः ग्रहणे प्रयोजनमस्ति। अयमेव सादृश्यरूपः नञर्थः साध्यते **"नञिवयुक्तमन्यसदृशाधिकरणे तथाह्यर्थावगतिः"**[2] इति परिभाषयाऽपि।

२.***अभावः*** – नञर्थे समन्वितस्य पदार्थस्य अभाव एवात्र अभावपदस्य तात्पर्यम्। यथा-"घटो नास्ति" "न कलत्रं भक्षयेत्" इत्यादिवाक्येषु घटसत्त्वस्य प्रतियोगिघटासत्त्वं कलञ्जभक्षणाभावश्च नञस्तात्पर्यम्। तत्र अभावः विभिन्नः, तच्चात्र विस्तरभयात् न स्पृश्यते। प्रसज्यपर्युदासयोस्तावत् व्याख्यां स्वयमग्रे चिकीर्षामि।

३.***तदन्यत्वम्*** - तदन्यत्वस्य अभिप्रायस्तु नञर्थे समन्वितात् पदार्थादितरपदार्थः ग्राह्यः। यथा- "अनश्वः" इत्येतेषु पदेषु अश्वाद्भिन्नस्य गर्दभादेर्ग्रहणत्वबोधनमेव नञः प्रयोजनम् ।

४.***तदल्पत्वम्*** - यत्र तु नञस्तात्पर्यं न तत्सदृशपदार्थग्रहणेन सिध्यति, न तु तदन्यग्रहणेन, अपि तु स्वसम्बद्धस्य पदार्थस्याल्पत्वबोधनेन सिध्यति, तत्र तदल्पत्वमेव नञर्थः ज्ञेयः। यथा- "अनुदरा कन्या" इत्यादिषु वाक्येषु। अत्र तावत् एतादृशकन्याग्रहणमसम्भवं यस्य उदरमेव न स्यात्। अतः एतादृशस्थलेषु अभावार्थोऽपि न सङ्गच्छते। किञ्च उदराद्भिन्नस्योदरसदृशगुणकस्येतरपदार्थस्य ग्रहणस्यापि असम्भवात्, तत्सादृश्यं तदन्यत्वं वा नात्र वक्तुरभिप्रायः। अतोऽत्र उदरनिषेधस्य तात्पर्यं तदल्पबोधनमर्थाद् अल्पोदरायाः कृशोदर्याः वा कन्यायाः बोधने नञः प्रयोजनमस्ति।

५.***अप्राशस्त्यम्*** - स्तुतेः प्रशंसाया वा भिन्नस्य निन्दार्थबोधकस्य नञः प्राशस्त्यमर्थः। "नञ्" इति अव्ययस्य अर्थः स्वसंयुक्तपदार्थनिन्दयाऽपि व्यक्तः भवति। यथा-"अपशवो वाऽन्ये गोऽश्वेभ्यः" इत्येतस्मिन् वाक्ये गोऽश्वाभ्यां भिन्नपशूनामप्रशस्तत्वादत्र "अपशु" इत्येतस्य तात्पर्यम्, न तु पशुभिन्नपदार्थग्राहकम्। एवञ्च गवादेर्भिन्नस्य इतरपशुग्रहणस्य निन्दा एव नञर्थोऽस्ति। एवम् **"अब्राह्मणोऽयम्"**[3] इत्यादिषु स्थलेषु "अब्राह्मण" इत्येनेन न हि ब्राह्मणसदृशस्य क्षत्रियादेर्ग्रहणम् अपि तु, ब्राह्मणविरुद्धाचरयितुः ब्राह्मणस्य निन्दा एवात्र नञर्थबोध्यः अर्थः।

६.***विरोधः***- क्वचित् नञ् विरोधार्थकोऽपि भवति। यथा- "अधर्मः" "असुरः" इत्यादिषु पदेषु नञा सह संयुक्तयोः धर्मसुरयोः विरुद्धार्थग्रहणबोधनेनैवात्र अभीष्टं सेत्स्यति। एवं प्रकारेण भर्तृहर्यादिभिः नञः षड्धा भेदः न्यरूपि।

❖ **नञर्थः द्विविधः** -

नव्यवैयाकरणैस्तावत् प्रकारान्तरेण पर्युदासप्रसज्यप्रतिषेधभेदेन नञर्थः द्विधा प्रत्यपादि। भट्टपादप्रभृतिभिः मीमांसकैरपि इदमेव सम्मतम्। तार्किकैस्तु एतद्विपरीततया अभावः तथा भेदः इत्येतौ द्वौ नञर्थौ इत्यङ्गीकृतौ। भेदः इत्यस्याभिप्रायः अन्योन्याभावः इति। अभावः इत्यस्याभिप्रायः तादात्म्येतरतादात्म्याभावरूपमिति। किञ्च नैयायिकानां प्राधान्यतो नञोऽभावार्थकत्वमेव सम्मतम्।

साम्प्रतं मीमांसकवैयाकरणसम्मतौ पूर्वोक्तौ पर्युदासप्रतिषेधौ कौ? कुत्र स्थलेषु तयोः सङ्गतिः भवति? इति इदमवश्यं विचार्यम्। तदुक्तं हरिणा-

**द्वौ नौ हि समाख्यातौ पर्युदासप्रसज्यकौ।**
**पर्युदासः सदृग्ग्राही प्रसज्यस्तु निषेधकृत्।।**[4]

- **पर्युदासनिषेधः**-

परि-उदित्युपसर्गद्वयपूर्वकाद् "अस्-धातोः" घञ्-प्रत्यये "पर्युदासः" इति शब्दः निष्पद्यते। यस्याभिप्रायः वर्तते सदृशपदार्थत्वमिति। तथा च येन पदार्थेन नञर्थस्यान्वयः स्यात्, तत्सदृशमिव इतरपदार्थग्रहणमिति पर्युदासनञः तात्पर्यम्। यथा-"नेक्षेतोद्यन्तमादित्यम्", "अब्राह्मणमानय" इत्यादिषु वाक्येषु ईक्षणब्राह्मणादिभिः अन्वितः नञ् आदित्यानीक्षणविषयकसङ्कल्पस्य विधानेन चरितार्थः भवति। एवञ्च ब्राह्मणेतरपुरुषस्य ग्रहणं विधत्ते। ईक्षणक्रियाया निषेधो नात्र नञ्-श्रुतेः प्रयोजनमस्ति। ईक्षणक्रियायाः निषेधस्तु लक्षणया अर्थतो ज्ञायते। अनेन प्रकारेण पर्युदासनिषेधे नञर्थः विधायकत्वमेव, निषेधस्तु आर्थः। अस्माद् कारणात् पर्युदासनिषेधः "प्रच्छन्नरूपविधिः" इत्यपि स्वीक्रियते। पर्युदासस्थलेषु नञ् सदा उत्तरपदार्थेन सहैवान्वेति। स तु उत्तरपदार्थः संज्ञावाचको वा धात्वर्थवाचको वा स्यात्। अतः स्पष्टमेतद् यत् पर्युदासनिषेधे नञ् नामधात्वर्थयोरुभयोः केनचिदपि समन्वितः भवति। वस्तुत एतादृशस्थलेषु प्रयुक्तस्य नञर्थस्य लक्ष्यं मुख्यतः स्वसंयुक्तपदार्थादितरं, किन्तु तत्सदृशस्यैव पदार्थस्य ग्राहको भवति ।

- **प्रसज्यप्रतिषेधः** -

नञर्थेन सहान्वितस्य प्रसक्तस्य क्रियादेर्निषेधः प्रसज्यप्रतिषेधस्य तात्पर्यम् । यत्र नञ्-प्रयोगे निषेध एव मुख्यार्थः स्याद् विध्यर्थस्तु गौणो भवति, तत्र प्रसज्यप्रतिषेधनाम्नो नञर्थभेदश्चरितार्थो भवति। प्रसज्यप्रतिषेधे प्राधान्येन क्रियया सह नञर्थोऽन्वितो भवति। क्रियया सह सम्बद्धः नञ् सदा प्रतिषेधार्थक एव। एष एव "शुद्धनिषेध" इति शब्देनोच्यते, यतो हि एवंविधेषु स्थलेषु निषेध एव वाक्यस्य प्रधानप्रयोजनमस्ति। यथा- "न कलञ्जं भक्षयेत्", "ब्राह्मणो न हन्तव्यः", "सुरां न पिबेत्", "न हि सुप्तस्य सिंहस्य प्रविशन्ति मुखे मृगाः" इत्यादिषु वाक्येषु नञर्थः क्रियया सह संयुक्तत्वादुक्तस्थलेषु निषेधार्थौ मुख्यः। अस्माद्धेतोरेतानि प्रसज्यप्रतिषेधस्योदाहरणानि सन्ति इति सिद्धं भवति। वस्तुतः एतादृशेषु वाक्येषु निषेधार्थस्य प्राधान्यमेवेष्टम्। अत एव नञ् क्रियाविधायकेन प्रत्ययार्थेन सहान्वितो भवति, नाम्ना धात्वर्थेन वा न संयुज्यते।

किञ्च समासस्थले समासस्य वैकल्पिकत्वेन समासवृत्तेः प्रयोगो विवक्षितो भवति। अतो यत्र समासस्य प्रयोगो वक्तुरनीप्सितं तत्र पर्युदासोऽसमस्तपदेष्वपि सम्भाव्यते। अनेन प्रकारेण पर्युदासनञ् उभयप्रकारकोऽस्ति। नञ् विशेष्यभूता क्रियया सह क्रियाविशेषणत्वेनान्वेति, अतः प्रसज्यप्रतिषेधः क्रियान्वयी भवति। "असूर्यललाटयोः" इत्यादौ तावत् सुबन्तस्य पदस्यासमर्थे सत्यपि यन्नञ् सुबन्तेन सह समस्यते, तस्य प्रामाणिकप्रयोगत्वात् तद्विषये क्रियायामेव तावत् तस्यान्वयः इत्यन्यदेतत्।

**तदुक्तम्** –

**"प्रसज्यप्रतिषेधोऽयं क्रियया सह यत्र नञ्"॥**
**"पर्युदासः स विज्ञेयः यत्रोत्तरपदेन नञ्"॥**

अयमाशयः यदा नञ् पर्युदासार्थकः भवति, तदा तस्यान्वयो नामधेयपदेन धात्वर्थेन सह वा भवति। एवम्भूते सति सः नञ् तद्भिन्नस्यार्थस्य द्योतकः भवति। अयन्तु पर्युदासप्रतिषेध इत्याख्यायते, एतदेव नैयायिकसम्मतं नञः भेदरूपत्वञ्चेति। अत्रैव तत्सम्मतः अन्योन्याभावरूपोऽर्थोऽपि अन्तर्भूतो भवति, यतो हि पर्युदासनञि तद्भिन्नस्य यद्ग्रहणं तदेव नञर्थस्य भेदकतारूपेणोक्तम्। येषु स्थलेषु नञः क्रियया सहान्वयो भवति, तत्र तस्यार्थो-

ऽत्यन्ताभावो भवति। एतदेव प्रसज्यप्रतिषेध इति संज्ञया अभिहितम्, यतो हि अस्मिन् नञभेदे “नान्तरिक्षे न दिवि” इत्यादीनामिव अप्राप्तप्रतिषेधो नास्ति, परं प्राप्तार्थस्यैव प्रतिषेधो भवति। एतादृशेषु स्थलेषु तार्किकमते “अत्यन्ताभावः” इति कथ्यते। निषेधस्तु वस्तुतः सत्पदार्थस्यैव भवति। अतः प्रसज्यप्रतिषेधस्या-त्यन्तनिषेधरूपत्वात् क्रियान्वयी नञर्थोऽपि “अत्यन्ताभावरूपः इत्यत्र नास्ति संशयः।

निपातानां द्योतकतायाः सर्वत्र प्रसिद्धत्वान् नञः निपातत्वाच्च, सोऽपि तात्पर्यग्राहकत्वेन द्योतक एव इत्यन्यदेतत्। निपातानां द्योतकत्वे स्वीकृते सत्येव नञ्तत्पुरुषस्य “उत्तरपदार्थप्राधानत्वमपि सङ्गतं स्यात्। अन्यथा नञो वाचकत्वे स्वीकृते पूर्वपदस्य प्राधान्यं प्राप्नोतीत्यतः उत्तरपदार्थप्राधान्यं न सङ्गच्छेत। एवं सति “असः शिवः” “अतस्मै ब्राह्मण” इत्यादिवाक्यगतेषु “असः” “अतस्मै” इत्यादिपदेषु सर्वनामकार्यमसम्भवम्, अतोऽस्मात्कारणादपि नञर्थ-स्य द्योतकत्वं सुदृढं सिद्धम्। इदमेव सर्वं मनसि निधाय नागेशाचार्यः आह- “आरोपितत्वं नञ्द्योत्यमिति”। वस्तुतः नञः षड्विधः अर्थः इति पक्षेऽपि, नञ् प्रसज्यपर्युदासान्तर्भूततया षड्विधानप्यर्थान् द्योतयति इति वैयाकरणहृदयम्।

**निष्कर्षः-**

आतश्च प्राचोक्तरीत्या “नञर्था षट् प्रकीर्तिताः” इति, आहोश्वित् “प्रसज्यपर्युदासभेदेन द्विधा” इति वा बाढं सिद्धमिति सर्वं सुस्थम्। इति शम्।

**सन्दर्भ**

1. वाक्यपदीयम्

2. परिभाषेन्दुशेखरः -७५ परिभाषा

3. महाभाष्ये-२.१६

4. वाक्यपदीयम्